# Brahmakritam 2 Subhadra Stotram

# ब्रह्मकृतं २ सुभद्रास्तोत्रम्

## Document Information

Text title : Brahmakritam 2 Subhadra Stotram

File name : brahmakRRitaM2subhadrAstotram.itx

Category : deities_misc, skandapurANa, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | puruShottamakhaNDa | adhyAya 27/52-62||

Latest update : May 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 5, 2025

*sanskritdocuments.org*

# ब्रह्मकृतं २ सुभद्रास्तोत्रम्

जय देवि जगन्मातः प्रसीद परमेश्वरि ॥ ५२॥

कार्यकारणकर्त्री त्वं सर्वशक्त्यै नमोऽस्तु ते ।
सर्वस्य हृदि संविष्टे ज्ञानमोहात्मिके सदा ॥ ५३॥

कैवल्यमुक्तिदे भद्रे त्वां नमामि सुरारणिम् ।
देवि त्वं विष्णुमायासि मोहयन्ती चराचरम् ॥ ५४॥

हृत्पद्मासनसंस्थासि विष्णुभावानुसारिणी ।
त्वमेव लक्ष्मीगौरी च शची कात्यायनी तथा ॥ ५५॥

यच्च किञ्चित्क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य शक्तिस्त्वं स्तोतुं त्वां कस्तु शक्तिमान् ॥ ५६॥

जय भद्रे सुभद्रे त्वं सर्वेषां भद्रदायिनि ।
भद्राभद्रस्वरूपे त्वं भद्रकालि नमोऽस्तु ते ॥ ५७॥

त्वं माता जगतां देवि पिता नारायणो हि सः ।
स्त्रीरूपं त्वं सर्वमेव पुंरूपो जगदीश्वरः ॥ ५८॥

युवयोर्न हि भेदोऽस्ति नास्त्यन्यत्परमेव हि ।
यथा वयं नियुक्ता हि त्वया वै विष्णुमायया ॥ ५९॥

निदेशकारिणो नित्यं भ्रमामः परमेश्वरि ।
वृत्तिः प्रवृत्तिः परमा क्षुधा निद्रा त्वमेव च ॥ २.२७.६०॥

आशा त्वमाशापूर्णा च सर्वाशा परिपूरिका ।
मुक्तिहेतुस्त्वमेवेशि बन्धहेतुस्त्वमेह हि ॥ ६१॥

सर्वज्ञानप्रदे नित्ये भक्तानां कल्पवल्लरी ।
त्राहि पादाब्जनम्रं मां कृपापाङ्गविलोकनैः ॥ ६२॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे पुरुषोत्तमजगन्नाथमाहात्म्ये

सप्तविंशाध्यायान्तर्गतं ब्रह्मकृतं सुभद्रास्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । पुरुषोत्तमखण्ड । अध्याय २७/५२-६२॥

skandapurANa . vaiShNavakhaNDa . puruShottamakhaNDa . adhyAya 27/52-62..

Proofread by PSA Easwaran

---

*Brahmakritam 2 Subhadra Stotram*

pdf was typeset on May 5, 2025

Please send corrections to *sanskrit@cheerful.com*